तथा शङ्खलिखितौ ।
"वाप्य केशनखान् पूर्व्वं ष्टतं प्राश्य बहिर्निशि ।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ॥
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिषवनं स्पृशेत् ।
एकवासार्द्रवासा वा लघ्वाशी स्थण्डिलेशय: ॥
स्नानी वीरासनी मौनी मौञ्जी दण्डकमण्डलुम् ।
भैक्षचर्य्याग्निकार्य्यञ्च कुश्माण्डैर्जुहुयाद्घृतम् ॥"
प्रत्येकं नियतं कालमिति व्रतसंख्या सङ्कल्पवाक्ये उल्लेखनीया इत्यर्थ: । वीरासनी भित्त्याद्यनाश्रित: । दण्डकमण्डलुं आर्षत्वात् मतुपो लोपेन तेनैतद्युक्त इत्यर्थ: । कुश्माण्डैर्यद्देवा देवहेलनमित्यादिमन्त्रै: । मनु: ।
"महाव्याहृतिभिर्होम: कर्त्तव्य: स्वयमन्वहम् ।
अहिंसासत्यमक्रोधमार्ज्जवञ्च समाचरेत् ।
त्रिरह्नस्त्रिर्निशायाञ्च सवासा जलमाविशेत् ॥"
त्रिरह्नस्त्रिर्निशायाञ्च इति षट्स्नानविषयमिदम् । पिपीलिकामध्यचान्द्रायणादितप्तकृच्छ्रवर्ज्जं फलातिशयार्थं बहुषु त्रिषवनविधानात् । तथा ।
"स्त्रीशूद्रपतितांश्चैव नाभिभाषेत कर्हिचित् ।
स्थानासनाभ्यां विहरेदशक्तोऽध:शयी भवेत् ॥
ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्च्चक: ।
सावित्रीञ्च जपेन्नित्यं पवित्राणि च शक्तित: ॥
सर्व्वेषु च व्रतेष्वेवं प्रायश्चित्तार्थमादृत: ॥"
ब्रह्मचारी मैथुनवर्ज्जं व्रती छत्रोपानहमाल्याञ्जनगन्धादिवर्ज्जम् । शूद्रेण सावित्रीजपस्थाने नारायणादिमन्त्रजप: कार्य्य: । अन्यद्वारा वा कारयितव्य: । एवमन्यत्रापि । यथा वराहपुराणम् ।
"अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ॥"
जावाल: ।
"आरम्भे सर्व्वकृच्छ्राणां समाप्तौ च विशेषत: ।
आज्येनैव हि शाकाग्नौ जुहुयाद्व्याहृती:
पृथक् ॥
श्राद्धं कुर्य्याद्व्रतान्ते च गोहिरण्यादिदक्षिणाम् ।
एते यज्ञो वसन् कुर्व्वन् ब्रह्मलोके महीयते ॥
स्त्रीणां होमो न कर्त्तव्य: पञ्चगव्यान्तथैव च ।
शूद्राणां पापिनाञ्चैव संवादं न च कारयेत् ॥
संवादस्तु न कर्त्तव्यस्त्रिवर्णैश्च कदाचन ।
ब्राह्मणेनैव वक्तव्य उत्पन्ने प्राणसंशये ॥"
श्राद्धमिति शुद्ध्यर्थं श्राद्धं दर्शितम् । स्त्रीभिर्होमो न कर्त्तव्य: पञ्चगव्यपानञ्च कृत्यानां कर्त्तरि वेति षष्ठी । प्रारब्धव्रतपीडया प्राणसंशये । अन्ये वर्णा न प्रष्टव्या ब्राह्मण एव प्रष्टव्य: । व्रतं मौनं पूर्व्वोक्तं । तत्र विशेषमाह आपस्तम्ब: । तत्र मौनमुक्तं नैविष्टहेसुगिभिरन्येरार्य्यैरभिभर्त्तुस्तैर्ध्नैर्हन्मान् सम्भाषायामुख एव यावद्यावदर्थं भाषते न मन्त्रलोपो भवतीति विज्ञायते । मन्त्रलोपो व्रतलोप: । बालवृद्धादिभिरङ्गहीनमपि व्रतं कार्य्यमित्याह षड्‌त्रिंशन्मतं: ।

"असंस्कृतो निवृत्ताख्यो रोगी गर्व्वतिजीवक: ।
यथाशक्ति प्रकुर्व्वीत व्रतं स्त्रीषु न लुप्यते ॥"
अशक्तावन्यद्वारापि कार्य्यमिति उक्तञ्च ब्रह्मपुराणे ।
"रोगी वृद्धस्तु पौगण्ड: कुर्व्वन्त्यन्यैर्व्रतं सदा ।
चतुर्थाद्वत्सराद्रूर्द्ध्वमष्टमं यावदेव हि ॥
शिशोर्व्रतं प्रकुर्व्वीरन् गुरुसम्बन्धिबान्धवा: ।
गुर्व्विणी बालवत्सा च रोगी द्रव्यपरायण: ॥
एते नक्तेषु भुञ्जन्ति बाला मध्याह्न एव च ।
व्रतस्थ: प्राणरक्षार्थं कदाचिदुदकं पिबेत् ॥
फलमूले तथा क्षीरं यज्ञशिष्टं तथा हवि: ।
व्रतमध्ये तु रोगार्त्तो वैद्यप्रोक्तमथौषधम् ॥
करोति च गुरोर्व्वाक्यं व्रतस्थस्तत्क्षणादपि ।
ब्राह्मणस्याभिलषितं साधयेदविचारयन् ॥
एतान्यष्टौ व्रतस्थानामव्रतघ्नानि कुत्रचित् ।
व्रतेष्वेतेषु देवांस्तान् व्रतस्थस्तु प्रपूजयेत् ॥"
पौगण्डो बाल: । द्रव्यपरायण: कुटुम्बी द्रव्यार्ज्जनपालनपर: सन्निधार्थ: । बौधायन: ।
"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पय: ।
हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम् ॥"
हारीतयमौ ।
"बलयश्चोपहारश्च हवींषि चरवस्तथा ।
निर्व्विशङ्केन भोक्तव्यं व्रतमस्य न लुप्यते ॥"
बलिर्वैश्वदेवादिदेवताभ्यो दत्त: । उपहारो नैवेद्यम् । चरु: पार्व्वणस्थालीपाकादि । अत्र चैषां दत्तावशिष्टं भक्षणीयमिति । देवल: ।
"उपवासो विनश्येत दिवास्वप्नाच्च मैथुनै: ।
अत्यये जलपानेन नोपवास: प्रणश्यति ॥"
वृद्धशातातप: ।
"गन्धालङ्कारवस्त्राणि पुष्पमाल्यानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥"
अलङ्कारवस्त्रसिन्दूरादि उपवासेन चेतना इत्यर्थ: । तथा ।
"स्त्रीणां सम्प्रेक्षणात् स्पर्शात् ताभि: संकथनादपि ।
ब्रह्मचर्य्यं विपद्येत न दारेष्वृतुगमादपि ॥"
संप्रेक्षणात् संकथनात् इति अत्र सरागत्वं संप्रत्ययार्थं: । इति प्रायश्चित्तविवेक: ॥ * ॥
प्रायश्चित्तात्मकव्रतानि यथा । विश्वामित्र: ।
"कृच्छ्रचान्द्रायणादीनि शुद्धाभ्युदयकारणम् ।
प्रकाशे च रहस्ये च संशयेऽशुक्तकेऽस्फुटे ॥
प्राजापत्य: सान्तपन: शिशुकृच्छ्र: पराकक: ।
अतिकृच्छ्र: पर्णकृच्छ्र: सौम्य: कृच्छ्रातिकृच्छ्रक: ॥
महासान्तपन: शुद्धो तप्तकृच्छ्रस्तु पावन: ।
जलोपवासकृच्छ्रस्तु ब्रह्मकूर्च्चस्तु शोधक: ॥
एते व्यस्ता: समस्ता वा प्रत्येकमेकशोऽपि वा ।
पातकादिषु सर्व्वेषु पापकेषु प्रयत्नत: ॥
कार्य्याश्चान्द्रायणैर्युक्ता: केवला वा विशुद्धये ।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा ॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति ।
उपवासस्त्रिरात्रञ्च मास: पञ्चदशैकम् ॥
षड्‌द्वादशाद्याहादि कार्य्यं शुद्धिमभीप्सिना ।
उपपातकयुक्तानामनादिष्टेषु चैव हि ॥
प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया ।
जातिशक्तिगुणान् दृष्ट्वा सकृद्‌बुद्धिकृतं तथा ।
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
द्वादशवार्षिकादिव्रतं प्रायश्चित्तविवेकादौ द्रष्टव्यम् ॥

व्रतति:, स्त्री, (प्र + तन विस्तारे + क्तिच् । पृषोदरादित्वात् पस्य व: ।) विस्तार: । लता । इत्यमर: ॥ (यथा, ऋग्वेदे । ८ । ४० । ६ ।
"अपि वृश्च पुराणवद्व्रततेरिव
गुष्पितमोजो दासस्य दम्भय ॥"
"व्रततेरिव यथा लताया गुष्पितं निर्गतां शाखां वृश्चति ।" इति तद्भाष्ये सायण: ॥)
व्रतती, स्त्री, (व्रतति + पक्षे ङीष् ।) विस्तार: । लता । इति भरतद्विरूपकोष: ॥ (यथा, रघु: । १४ । १ ।
"अपश्यतां दाशरथी जनन्यौ
छेदादिवोपघ्नतरोर्व्रतत्यौ ॥")
व्रतभिक्षा, स्त्री, (व्रते उपनयनकाले भिक्षा ।) उपनयनकालीनभिक्षा । तस्या विधिर्यथा । अथ भैक्षचरति । अथ शब्दस्तूष्णीमादित्योपस्थानमग्निप्रदक्षिणञ्च शंसति ।
"प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् ।
प्रदक्षिणं परीत्याग्निं चरेत् भैक्ष्यं यथाविधि ॥"
इति मनुवचनात् ।
भिक्षासमूहं भैक्ष्यं तच्चरति आचरति इत्यर्थ: । मातरमेवाग्रे ये चान्ये सुहृदो याचन्त्यो वा सन्निहिता: स्यु: । याचते इत्यध्याहार्य्यम् । सुहृदे स्निग्धहृदये स्वसादौ । तथा च मनु: ।
"मातरं वा स्वसारं वा मातुर्व्वा भगिनीं
निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥"
सन्निहितास्तद्देशस्था: न तु प्रतिगृहं गत्वा । भवति भिक्षां देहीति ब्राह्मणभिक्षाप्रयोग: । तथा च मनु: ।
"भवत्पूर्व्वं चरेत् भैक्ष्यमुपनीतद्विजोत्तम: ।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥
आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ।
ब्राह्मणक्षत्रियविशां भैक्ष्यचर्य्या यथाक्रमम् ॥"
इति याज्ञवल्क्यवचनाच्च । इति संस्कारतत्त्वम् ॥
व्रतसंग्रह:, पुं, (व्रतस्य संग्रह: ।) दीक्षा । इति हेमचन्द्र: ॥
व्रतादेश:, पुं, (व्रतस्यादेश: ।) उपनयनम् । यथा,
"आदन्तजननात् सद्य आचूडादेकरात्रकम् ।
त्रिरात्रमाव्रतादेशात् दशरात्रमत: परम् ॥"
इति शुद्धितत्त्वम् ॥
व्रती, [न्] पुं, (व्रतमस्यास्तीति । व्रत + इनि: ।) यजमान: । इत्यमर: ॥ (ब्रह्मचारी । यथा, मनु: । २ । १८८ ।
"भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥")